

श्रीनरसिंहपुराणे प्रतिष्ठाविधिर्नाम षट्पञ्चाशोऽध्यायः ५६

राजोवाच

साम्प्रतं देवदेवस्य नरसिंहस्य शार्ङ्गिणः
श्रोतुमिच्छामि सकलं प्रतिष्ठायाः परं विधिम् १
श्रीमार्कण्डेय उवाच
प्रतिष्ठाया विधिं विष्णोर्देवदेवस्य चक्रिणः
प्रवक्ष्यामि यथाशास्त्रं शृणु भूपाल पुण्यदम् २
कर्तुं प्रतिष्ठां यश्चात्र विष्णोरिच्छति पार्थिव
स पूर्वं स्थिरनक्षत्रे भूमिशोधनमारभेत् ३
खात्वा पुरुषमात्रं तु बाहुद्वयमथापि वा
पूरयेच्छुद्धमृद्भिस्तु जलाक्तैः शर्करान्वितैः ४
अधिष्ठानं ततो बुद्ध्वा पाषाणेष्टकमृण्मयम्

प्रासादं कारयेत्तत्र वास्तुविद्याविदा नृप ५
चतुरस्त्रं सूत्रमार्गे चतुःकोणं समन्ततः
शिलाभित्तिकमुत्कृष्टं तदलाभेष्टकामयम् ६
तदलाभे तु मृत्कुडयं पूर्वद्वारं सुशोभनम्
जातिकाष्ठमयैः स्तम्भैरतल्लग्नैः कलदान्वितैः ७
उत्पलैः पद्मपत्रैश्च पातितैश्चित्रशिल्पिभिः
इत्थ तु कारयित्वा हि हरेर्वेश्म सुशोभनम् ८
पूर्वद्वारं नृपश्रेष्ठ सुकपाटं सुचित्रितम्
अतिवृद्धातिबालैस्तु कारयेन्नाकृतिं हरेः ९
कुष्ठाद्युपहतैर्वापि अन्यैर्वा दीर्घरोगिभिः
विश्वकर्मोक्तमार्गेण पुराणोक्तां नृपोत्तम १०
कारयेत्प्रतिमां दिव्यां पुष्टाङ्गेन तु धीमता
सौम्याननां सुश्रवणां सुनासां च सुलोचनाम् ११
नाधोदृष्टिं नोर्ध्वदृष्टिं तिर्यग्दृष्टिं न कारयेत्
कारयेत् समदृष्टिं तु पद्मपत्रायतेक्षणाम् १२
सुभ्रुवं सुललाटां च सुकपोलां समां शुभाम्
बिम्बोष्ठीं सुष्ठुचिबुकां सुग्रीवां कारयेद्बुधः १३
उपबाहुकरे देयं दक्षिणे चक्रमर्कवत्
नाभिसंलग्नदिव्यारं परितो नेमिसंयुतम् १४
वामपार्श्वेत्युपभुजे देयं शङ्खं शशिप्रभम्
पाञ्चजन्यमिति ख्यातं दैत्यदर्पहरं शुभम् १५
हारार्पितवरां दिव्यां कण्ठे त्रिवलिसंयुताम्
सुस्तनीं चारुहृदयां सुजठरां समां शुभाम् १६
कटिलग्नवामकरां पद्मलग्नां च दक्षिणाम्
केयूरबाहुकां दिव्यां सुसाभिवलिभङ्गिकाम् १७
सुकटीं च सुजङ्घोरूं वस्त्रमेखलभूषिताम्

एवं तां कारयित्वा तु प्रतिमां राजसत्तम १८
सुवर्णवस्त्रदानेन तत्कतॄन् पूज्य सत्तम
पूर्वपक्षे शुभे काले प्रतिमां स्थापयेद्बुधः १९
प्रासादस्याग्रतः कृत्वा यागमण्डपमुत्तमम्
चतुर्द्वारं चतुर्दिक्षु चतुर्भिस्तोरणैर्युतम् २०
सप्तधान्याङ्कुरैर्युक्तं शङ्खभेरीनिनादितम्
प्रतिमां क्षाल्य विद्वद्भिः षट्त्रिंशद्भिर्घटोदकैः २१
प्रविश्य मण्डपे तस्मिन् ब्राह्मनैर्वेदपारगैः
तत्रापि स्नापयेत्पश्चात् पञ्चगव्यैः पृथक्पृथक् २२
तथोष्णवारिणा स्नाप्य पुनः शीतोदकेन च
हरिद्राकुङ्कमाद्यैस्तु चन्दनैश्चोपलेपयेत् २३
पुष्पमाल्यैरलंकृत्य वस्त्रैसच्छाद्य तां पुनः
पुण्याहं तत्र कृत्वा तु ऋग्भिस्ता प्रोक्ष्य वारिभिः २४
स्नात्वा तां ब्राह्मणैर्भक्तैः शङ्खभेरीस्वनैर्युतम्
वासयेत्सप्तरात्रं तु त्रिरात्रं वा नदीजले २५
हृदे तु विमले शुद्धे तडागे वापि रक्षयेत्
अधिवास्य जले देवमेवं पार्थिवपुंङ्गव २६
तत उत्थाप्य विप्रैस्तु स्थाप्यालंकृत्य पूर्ववत्
ततो भेरीनिनादैस्तु वेदघोषैश्च केशवम् २७
आनीय मण्डपे शुद्धे पद्माकारविनिर्मिते
कृत्वा पुनस्ततः स्नाप्य विष्णुभक्तरलक्रियात् २८
ब्राह्मणान् भोजयित्वा तु विधिवत् षोडशर्त्विजः
चतुर्भिरध्ययनं कार्यं चतुर्भिः पालनं तथा २९
चतुर्भिस्तु चतुर्दिक्षु होमः कार्यो विचक्षणैः
पुष्पाक्षतान्नमिश्रेण दद्याद्दिक्षु बलीन् नृप ३०
एकेन दापयेत्तेषामिन्द्राद्याः प्रीयन्तामिति

प्रत्येकं सायंसंध्यायां मध्यरात्रे तथोषसि ३१
उदिते च ततो दद्यान्मातृविप्रगणाय वा
जपन् पुरुषसूक्तं तु एकतस्तु पुनः पुनः ३२
एकतो मनसा राजन् विष्णोर्मन्दिरमध्यगः
अहोरात्रोषितो भूत्वा यजमानो द्विजैः सह ३३
प्रविश्य प्रतिमाद्वारं शुभलग्ने विचक्षणः
देवसूक्तं द्विजैः सःर्धमुपस्थाप्य च तां दढम् ३४
संस्थाप्य विष्णुसूक्तेन पवमानेन वा पुनः
प्रोक्षयेद्देवदेवेशमाचार्यः कुशवारिणा ३५
तदग्रे चाग्निमाधाय सम्परिस्तीर्य यत्नतः
जुहुयाज्ञातकर्मादि गायत्र्या वैष्णवेन तु ३६
चतुर्भिराज्याहुतिभिरेकामेकां क्रियां प्रति
आचार्यस्तु स्वयं कुर्यादस्त्रैर्बन्धं च कारयेत् ३७
त्रातारमिति चैन्द्र्यां तु कुर्यादाज्यप्रणुन्नकम्
परोदिवेति याम्यायां वारुण्यां निषसेति च ३८
या ते रुद्रेति सौम्यां तु हुवेदाज्याहुतीर्नृप
परोमात्रेति सूक्ताभ्यां सर्वत्राज्याहुतीर्नृप ३९
हुत्वा जपेच्च विधिवद्यदस्येति च स्विष्टकृत्
ततः स दक्षिणां दद्यादृत्विग्भ्यश्च यथार्हतः ४०
वस्त्र द्वे कुण्डले चैव गुरवे चाङ्गुलीयकम्
यजमानस्ततो दद्याद्विभवे सति काञ्चनम् ४१
कलशाष्टसहस्रेण कलशाष्टशतेन वा
एकविंशतिना वापि स्नपनं कारयेद् बुधः ४२
शङ्खदुन्दुभिनिर्घोषर्वेदघोषैश्च मङ्गलैः
यवव्रीहियुतैः पात्रैरुद्धृतैरुच्छ्रिताङ्कुरैः ४३
दीपयष्टिपताकाभिश्छत्रचामरतोरणैः

स्नपनं कारयित्वा तु यथाविभवस्तरेम् ४४
तत्रापि दद्याद्विप्रेभ्यो यथाशक्त्या तु दक्षिणाम्
एवं यः कुरुते राजन् प्रतिष्ठां देवचक्रिणः ४५
सर्वपापविनिर्मुक्तः सर्वभूषणभूषितः
विमानेन विचित्रेण त्रिस्सप्तकुलजैर्वृतः ४६
पूजां सम्प्राय महतीमिन्द्रलोकादिषु क्रमात्
बान्धवांस्तेषु संस्थाप्य विष्णुलोके महीयते ४७
तत्रैव ज्ञानमासाद्य वैष्णवं पदमाप्नुयात्
प्रतिष्ठाविधिरयं विष्णोर्मयैवं ते प्रकीर्तितः ४८
पठतां शृणवतां चैव सर्वपापप्रणाशनः ४९
यदा नृसिंहं नरानाथ भूमौ
संस्थाप्य विष्णुं विधिना ह्यनेन
तदा ह्यसौ याति हरेः पदं तु
यत्र स्थितोऽयं न निवर्तते पुनः ५०

इति श्रीनरसिंहपुराणे प्रतिष्ठाविधिर्नाम षट्पञ्चाशोऽध्यायः ५६